**ब्रेन इंटरनेशनल स्कूल**
**अभ्यास पत्र –(2025–26)**
**विषयः – संस्कृतम्**

| समयः – होरात्रयम् (3) | कक्षा–दश | पूर्णाङ्का : 80 |
|---|---|---|

(10 अङ्काः)

## खण्डः 'क' अपठित-अवबोधनम्

1. **निम्नलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् उत्तरत–**

सत्सङ्गतेः महिमानम् को न जानाति? संसारे सज्जनाः दुर्जनाः चापि सन्ति। दुर्जनस्य संगतिं कोऽपि कर्तुं न इच्छति। अपरत्र सत्संगं विना मानवस्य जीवनम् एव दुर्जीवनं भवति। वस्तुतः सत्संगतिः जनानां पोषिका कुसंगतिश्च नाशिका। सर्वे जनाः स्वपोषणमेव इच्छन्ति विनाशं तु न। अतः सत्संगतिः एव श्रेयसी। सज्जनाः तु स्वगुणैः एव सन्ताः कथ्यन्ते, अतएव जनाः सज्जनानां गुणेभ्यः स्पृहयन्ति। सद्गुणेनैव जनः मनसा, वाचा कर्मणा च स्वस्थो भवति। तेन तस्य आयुः वर्धते, यशः अपि सततं वर्धते। को न जानाति यत् सर्वेषां देशानां महापुरुषाः अपि सत्संगत्या श्रेष्ठां पदवीं प्राप्नुवन्। उक्तं हि भवभूतिना– **सत्संगजानि निधनान्यपि तारयन्ति।**

**I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) सत्संगं विना जीवनं किं भवति?

(*ii*) कुसंगतिः कीदृशी?

(*iii*) कस्य संगतिं कोऽपि कर्तुं न इच्छति?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) संसारे कीदृशाः जनाः सन्ति?

(*ii*) भवभूतिना किम् उक्तम्?

(*iii*) सत्संगं विना मानवस्य जीवनं कीदृशं भवति?

**III. यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्)**

(*i*) 'कुसंगतेः' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) सुसंगतेः (ख) संगतेः (ग) सत्सङ्गतेः (घ) दुस्सङ्गतेः

(*ii*) 'जनाः गुणेभ्यः स्पृहयन्ति' अत्र कर्तुः वचनम् किम्?

(क) बहुवचनम् (ख) एकवचनम् (ग) द्विवचनम् (घ) किमपि न

(*iii*) 'अलभन्त' इत्यर्थे अत्र गद्यांशे किं पदं प्रयुक्तम्?

(क) वर्धते (ख) अवर्धन्त (ग) प्राप्नुवन् (घ) अलभन्

(*iv*) 'श्रेष्ठां पदवीम्' अनयोः विशेषणं किम्?

(क) पद्वी (ख) पदवीम् (ग) श्रेष्ठाम् (घ) श्रेष्ठा

**IV. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।**

## खण्डः 'ख' रचनात्मक-कार्यम्

(15 अङ्काः)

2. **भवान् एकः विज्ञान-विद्यार्थी वर्तते। रचना सागर (प्रा०) लि० प्रकाशकं प्रति भवान् देवेन्द्रः पत्रं लिखित्वा विज्ञानस्य नूतनप्रकाशितानि पुस्तकानि प्रेषयितुं प्रार्थनां करोति। भवान् इदं पत्रं कथं लेखिष्यति इति मञ्जूषायाः सहायतया पत्रं पूरयतु भवान्–**

महर्षिः दयानन्दः आर्यः विद्यालयः
राजौरी गार्डन
(*i*) ........................
तिथिः ........................

सेवायाम्
श्रीमान् प्रकाशकमहोदय!
(*ii*) ........................
नवदिल्ली

**विषयः– विज्ञानस्य नूतनप्रकाशितानि (*iii*) .................. प्रेषयितुं पत्रम्।**

महोदय,

सादरं निवेदनम् अस्ति यत् अहं महर्षि-दयानन्द-आर्य-विद्यालये एकः (*iv*) .................. अस्मि। मम विज्ञानाध्यापकः ह्यः एव भवद्भिः सद्यः (*v*) .................. विज्ञानपुस्तकानि अपश्यत्, सः तेषां पुस्तकानाम् अतीव प्रशंसाम् कृतवान्। अहमपि तानि (*vi*) .................. पठितुम् इच्छामि अतः भवतां सेवायां (*vii*) .................. अस्ति यत् मम इदं पत्रं प्राप्य शीघ्रमेव तानि पुस्तकानि वी०पी०पी० द्वारा (*viii*) ..................। अहं पुस्तकानि प्राप्य सद्यः एव मूल्यं प्रेषयिष्यामि।

भवताम् अतीव (*ix*) .................. भविष्यति।

भवतां शुभेच्छुकः
(*x*) ........................

**मञ्जूषा**

| |
|---|
| निवेदनम्, रचना सागर (प्रा०) लि०, प्रकाशितानि, पुस्तकानि, नवदिल्ली, कृपा, पुस्तकानि, देवेन्द्रः, छात्रः, प्रेषणीयानि |

3. **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते पञ्च वाक्यानि रचयत–**



**मञ्जूषा**

| |
|---|
| पिपासितः, काकः, पाषाणखण्डानि, घटस्य, जलम्, वृक्षाः, उपतिष्ठति, क्षिपति, आगच्छति, गृहम्, पर्वताः, उपरि |

**अथवा**

**'साक्षरतायाः लाभाः' इति विषये मञ्जूषायाः पदानां सहायतया सरलसंस्कृते एकं अनुच्छेदं लिखत–**

**मञ्जूषा**

| |
|---|
| अक्षरज्ञानम्, जनानाम्, स्वहस्ताक्षरम्, आवेदनपत्रम्, नियुक्तिपत्रम्, राशिपत्रम्, पठितुं शक्यते, कोऽपि वञ्चितुं समर्थः, सर्वकारसमर्थितं जनान्दोलनम् वर्तते, ज्ञानपूर्णग्रन्थाणां पठने, चरित्रशिक्षणे, आदर्शशिक्षाग्रहणे। |

## खण्डः 'ख' रचनात्मक-कार्यम् (15 अङ्काः)

2. **भवान् एकः विज्ञान-विद्यार्थी वर्तते। रचना सागर (प्रा०) लि० प्रकाशकं प्रति भवान् देवेन्द्रः पत्रं लिखित्वा विज्ञानस्य नूतनप्रकाशितानि पुस्तकानि प्रेषयितुं प्रार्थनां करोति। भवान् इदं पत्रं कथं लेखिष्यति इति मञ्जूषायाः सहायतया पत्रं पूरयतु भवान्–**

महर्षिः दयानन्दः आर्यः विद्यालयः
राजौरी गार्डन
(*i*) ..........................
तिथिः ..........................

सेवायाम्
श्रीमान् प्रकाशकमहोदय!
(*ii*) ..........................
नवदिल्ली

**विषयः– विज्ञानस्य नूतनप्रकाशितानि (*iii*) .................... प्रेषयितुं पत्रम्।**

महोदय,
सादरं निवेदनम् अस्ति यत् अहं महर्षि-दयानन्द-आर्य-विद्यालये एकः (*iv*) .................... अस्मि। मम विज्ञानाध्यापकः ह्यः एव भवद्भिः सद्यः (*v*) .................... विज्ञानपुस्तकानि अपश्यत्, सः तेषां पुस्तकानाम् अतीव प्रशंसाम् कृतवान्। अहमपि तानि (*vi*) .................... पठितुम् इच्छामि अतः भवतां सेवायां (*vii*) .................... अस्ति यत् मम इदं पत्रं प्राप्य शीघ्रमेव तानि पुस्तकानि वी०पी०पी० द्वारा (*viii*) ....................। अहं पुस्तकानि प्राप्य सद्यः एव मूल्यं प्रेषयिष्यामि।
भवताम् अतीव (*ix*) .................... भविष्यति।

भवतां शुभेच्छुकः
(*x*) ..........................

**मञ्जूषा**

| |
|---|
| निवेदनम्, रचना सागर (प्रा०) लि०, प्रकाशितानि, पुस्तकानि, नवदिल्ली, कृपा, पुस्तकानि, देवेन्द्रः, छात्रः, प्रेषणीयानि |

3. **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते पञ्च वाक्यानि रचयत–**



**मञ्जूषा**

| |
|---|
| पिपासितः, काकः, पाषाणखण्डानि, घटस्य, जलम्, वृक्षाः, उपतिष्ठति, क्षिपति, आगच्छति, गृहम्, पर्वताः, उपरि |

**अथवा**

**'साक्षरतायाः लाभाः' इति विषये मञ्जूषायाः पदानां सहायतया सरलसंस्कृते एकं अनुच्छेदं लिखत–**

**मञ्जूषा**

| |
|---|
| अक्षरज्ञानम्, जनानाम्, स्वहस्ताक्षरम्, आवेदनपत्रम्, नियुक्तिपत्रम्, राशिपत्रम्, पठितुं शक्यते, कोऽपि वञ्चितुं समर्थः, सर्वकारसमर्थितं जनान्दोलनम् वर्तते, ज्ञानपूर्णग्रन्थाणां पठने, चरित्रशिक्षणे, आदर्शशिक्षाग्रहणे। |

4. अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत–

महर्षेः आरुणेः पुत्रः (*i*) ……………… आसीत्। यदा सः (*ii*) ………… अभवत् तदा पिता आरुणि तं (*iii*) ………… अप्रेषयत्। सः पुत्रः आचार्यम् उपेत्य यावत् (*iv*) ……………… अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। "अहम् सर्वश्रेष्ठः" इति मन्यमानः सः (*v*) ………… अभवत्। एवं भूतं पुत्रं दृष्ट्वा पिता तम् उवाच-हे श्वेतकेतो! त्वम् आचार्यात् कः ईदृशः ग्रहीतः येन त्वं (*vi*) ………… विपरीतम् अहङ्कारी अभवः? हे पुत्र! किं त्वं तं (*vii*) ………… जानासि यस्य ज्ञानस्य पश्चात् सर्वम् अज्ञातं ज्ञातम्, यस्य श्रवणस्य पश्चात् सर्वम् (*viii*) ………… श्रुतम् सर्वम् अमतमपि मतं भवति। इदं श्रुत्वा श्वेतकेतुः अवदत्– "कथम् इदम् इति?" इदं श्रुत्वा पिता तस्मै (*ix*) ………… वटवृक्षस्य उदाहरणं यच्छन् जगतः (*x*) ………… प्रतिपादयति ।

**मञ्जूषा**

| |
|---|
| स्वकुलपरम्परायाः, अश्रुतमपि, श्वेतकेतुः, तत्वज्ञानम्, न्यग्रोधफलमाध्यमेन, द्वादशवर्षीयः, उद्धतस्वभावः, तत्वं, गुरुकुलम्, अश्रुतमपि चतुर्विंशतिवर्षः |

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत–**

कक्षायां शिक्षक-छात्र मध्ये संस्कृतभाषायाः महत्त्वमुपरि भूतं वार्तालापं मञ्जूषायाः सहायतया पूरयत यूयम्–

छात्रः – गुरुदेव! भवान् संस्कृतभाषायाः महत्त्वमुपरि किञ्चिद् वदतु।

शिक्षकः – पुत्र! संस्कृतभाषा (*i*) ……………………………?

छात्रः – भवान् इदं कथं कथयति यत् संस्कृतभाषा सर्वप्राचीना सर्वोत्कृष्टा च अस्ति?

शिक्षकः – प्रिय वत्स! शृणु (*ii*) ……………………………?

छात्रः – इदं तु सत्यमस्ति यत् संस्कृतस्य व्याकरणं तु विशालतमं वर्तते। परम् एषा तु सर्वप्राचीना कथम्?

शिक्षकः – एतद् इदं (*iii*) ……………………………?

छात्रः – गुरुदेव! विज्ञानक्षेत्रे कथम् इदं ज्ञायते?

शिक्षकः – पुत्र! संसारस्य विज्ञाने ये शब्दाः प्रयुज्यन्ते (*iv*) ……………………………?

छात्रः – गुरुवर! अन्तरिक्ष विज्ञाने कथं संस्कृतशब्दाः साहाय्यं कुर्वन्ति?

शिक्षकः – (*v*) ……………………………?

छात्रः – भवान् सत्यं वदति अहम् अधुना अस्याः भाषायाः अध्ययनं प्राणपणेन करिष्यामि।

शिक्षकः – उत्तमम्। भवान् अग्रे वर्धतु।

**मञ्जूषा**

| |
|---|
| सर्वप्राचीना सर्वोत्कृष्टा च अस्ति, पुत्र! अन्तरिक्षे तु गुरुत्वाकर्षणशून्यतया शब्दानां क्रमाः परिवर्तिताः भवन्ति अतः अन्यासां भाषाणां अनेन अर्थाः परिवर्तन्ते परं संस्कृतेन सह एतत् न भवति, संस्कृतस्य व्याकरणं तु विशालतमं वर्तते, ते तु पूर्वतः एव संस्कृतभाषायां सन्ति, यत् संस्कृतभाषायाः शब्दाः तु सर्वासु भाषासु तत्सम तद्भव वा रूपेण सन्ति। |

## खण्डः 'ग' अनुप्रयुक्त-व्याकरणम् (25 अङ्काः)

5. निम्नलिखितवाक्येषु रेखाङ्कितपदानां **सन्धिं विच्छेदं वा कृत्वा लिखत**– **(केवलं प्रश्नचतुष्टयम्)**

(*i*) एतत् आसनम् कवे + ए अस्ति।

(*ii*) किमर्थम् अत्र बाला + एका रोदति?

(*iii*) सा पत्युर्गृहं गच्छति।

(*iv*) देवासुरसंग्रामे देवा जयन्ते।

(*v*) एतत् + न रोचते।

6. **रेखाङ्कितपदानां समासं विग्रहं वा कृत्वा लिखत– (केवलं प्रश्नचतुष्टयम्)**

(*i*) न्यायाधीशः यथानियमम् अपराधिनं दण्डयति।

(क) नियमम् अनतिक्रम्य (ख) नियमस्य अनतिक्रमय

(ग) नियमः अनतिक्रम्य (घ) नियमम् अपमिक्रम्य

(*ii*) भरतः सीतां च रामं च दृष्ट्वा प्रसन्नः अभवत्।

(क) सीतारामम् (ख) सीतारामौ (ग) सीतारामः (घ) सीतारामे

(*iii*) सचित्रं पाठ्यपुस्तकं आनय।

(क) चित्रेण सहितम् (ख) चित्रस्य समीपम् (ग) चित्रेण अनतिक्रम्य (घ) चित्रस्य योग्यम्

(*iv*) पुत्रौ दृष्ट्वा माता प्रसीदति।

(क) पुत्रं पुत्रं च (ख) पुत्रं च पुत्रं च (ग) पुत्रं पुत्रेण च (घ) पुत्रः पुत्रः च

(*v*) बालकः प्रतिदिनं उद्याने विहरति।

(क) दिनस्य दिनस्य इति (ख) दिन दिन प्रति

(ग) दिनं दिनं इति (घ) प्रति प्रति दिनं

7. **अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययान् संयोज्य विभज्य वा लिखत– (केवलं प्रश्नचतुष्टयम्)**

(*i*) मम अनुज + टाप् देवीरूपं अस्ति।

(क) अनुजया (ख) अनुज्या (ग) अनुजा (घ) अनुजः

(*ii*) धन + मतुप् निर्धनानां सहायतां कुर्वन्ति।

(क) धनवान् (ख) धनमान् (ग) धनवती (घ) धनहीनः

(*iii*) अद्य साप्ताहिकी परीक्षा भविष्यति।

(क) सप्ताह + टाप् (ख) सप्ताह + ङीप् (ग) सप्ताह + ठक् (घ) सप्ताह + क्त

(*iv*) श्रीकृष्णः अति ज्ञान + मतुप् आसीत्।

(क) ज्ञाने (ख) ज्ञानी (ग) ज्ञानीम् (घ) ज्ञानवान्

(*v*) नारायण + ङीप् नमोऽस्तु ते।

(क) नारायण + ङीप् (ख) नारायणी + टाप् (ग) नारायण + टाप् (घ) नारायणः + ङीप्

8. **वाच्यानुसारं कोष्ठकेषु प्रदत्तपदैः रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्)**

(*i*) युष्माभिः तत्र ...................................। (*ii*) श्रोतृभिः कथा ...................................।

(*iii*) ................................ लेखाः लिख्यन्ते। (*iv*) ................................ पुस्तकं पठन्ति।

**मञ्जूषा**

| स्था, श्रू, लेखक, छात्र |
|---|

9. **अङ्कानां स्थाने संस्कृते समयं लिखत यत् तव पितामही कदा किं च कार्यं करोति? (केवलं प्रश्नत्रयम्)**

(*i*) सा प्रातः (5:00) ........................... वादने उत्तिष्ठति।

(*ii*) सा (6:30) ........................... वादने ईशवन्दनां करोति।

(*iii*) यदा अहम् (2:15) ...................... वादने विद्यालयतः आगच्छामि सा मया सह भोजनं करोति।

(*iv*) सा (2:45) ........................... वादने विश्रामं करोति।

10. **मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत– (केवलं प्रश्नचतुष्टयम्)**

(*i*) त्वम् ................................ उत्तिष्ठसि? (*ii*) ते ................................ आगच्छन्ति?

(*iii*) मम ग्रामात् ........... एका नदी अस्ति। (*iv*) अहं तु ............... विदेशं न अगच्छम्।

(*v*) धनं विना जीवनं .................. भवति।

**मञ्जूषा**

| बहिः, कुतः, कदा, कदापि, वृथा |
|---|

11. **निम्नवाक्येषु रेखाङ्कितपदानां संशोधनं कृत्वा पुनर्लिखत– (केवलं प्रश्नत्रयम्)**

(*i*) जन्तुशालायां अनेके सिंहः आसन्।

(क) सिंहाः (ख) सिंहे (ग) सिंहानाम् (घ) सिंहेषु

(*ii*) तत्र वानराः अपि कूर्दति।

(क) कूर्दतः (ख) कूर्दन्ति (ग) कूर्दसि (घ) कूर्दन्ते

(*iii*) एतत् दृष्ट्वा बालकाः प्रसन्नम् अभवन्।

(क) प्रसन्ना (ख) प्रसन्ने (ग) प्रसन्नाः (घ) प्रसन्न

(*iv*) ते सर्वाः पुनरपि आगन्तुम् अचिन्तयन्।

(क) सर्वम् (ख) सर्वे (ग) सर्वाणि (घ) सर्वाः

## खण्डः 'घ' पठित-अवबोधनम्

(30 अङ्काः)

12. **अधोलिखितं गद्यांशं, पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–**

अहो अज्ञानं भवत्याः। अरे! यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जनाः प्रियस्य आगमनसंकेतं मत्वा हृष्यन्ति। किं बहुना! अहं तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति– "अनृतं वदसि चेत् काकः दशेत्।" अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्। सर्वथा जागरूकोऽहं छात्राणाम् कृते आदर्शः एव।

**I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) काः शिशून् कथयन्ति– "अनृतं वदसि चेत् काकः दशेत्?"

(*ii*) काकः किमर्थम् छात्राणां कृते आदर्शः मन्यते?

(*iii*) प्रियस्य आगमनसंकेतं मत्वा के हृष्यन्ति?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) जनाः कदा हृष्यन्ति?

(*ii*) मातरः शिशून किं कथयन्ति?

(*iii*) 'सर्वथा जागरूकोऽहं छात्राणाम् कृते आदर्शः एव।' इति कः वदति?

**III. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) 'कथयन्ति' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(*ii*) 'असत्यम्' इति पदस्य कः पर्यायः अत्र प्रयुक्तम्?

(*iii*) 'दुखीयन्ति' इति पदस्य कः विपर्ययः अत्र प्रयुक्तः?

13. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–**

कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी ॥

**I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) का सुखदा भवति?

(*ii*) कः अनर्थफलदायको भवति?

(*iii*) साधुजनमैत्री कीदृशी भवति?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) सर्वविपत्तीनां नाशे कः समर्थः भवति?

(*ii*) मानः कीदृशम् भवति?

(*iii*) सर्वथा त्यागी कासाम् नाशे समर्थः भवति?

**III. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) 'दुःखदा' पदस्य विपरीतार्थकपदम् अत्र किम्?

(*ii*) 'कुशलः' इति पदस्य कः पर्यायः श्लोके प्रदत्तः?

(*iii*) 'अनर्थफलः मानः' अनयोः पदयोः विशेषणपदं किम्?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–**

राजा उवाच – भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि?

विप्रः उवाच – यदि भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

तत् श्रुत्वा राजा अचिन्तयत् – "लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानमिच्छन् अयं याचकः केनापि प्रेरितः स्यात्! अथवा भवतु नाम। किं बहु चिन्तनेन।"

इति विचार्य राजा अभाषत – भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।

**I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) राजा कम् अनुगृहीतं कर्तुम् इच्छति?

(*ii*) कः चक्षुर्द्वयं दातुम् इच्छति?

(*iii*) राजा आत्मानं किं कर्तुम् इच्छति?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) लोके कस्य दानं दुष्करं भवति?

(*ii*) 'लोके चक्षुर्दानं दुष्करमेव भवति' इति कः अचिन्तयत्?

(*iii*) राजा किं दातुम् इच्छति?

**III. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्)**

(*i*) 'मम लोकयात्रा निर्बाधा भवेत्' अत्र विशेषणपदं किम्?

(*ii*) नाट्यांशे 'दाता' पदस्य कः विपर्ययः प्रयुक्तः?

(*iii*) 'प्रयच्छामि' इत्यस्याः क्रियायाः कर्तृपदं किम्?

**15.** रेखाङ्कितपदानि **आधृत्य प्रश्ननिर्माणं कृत्वा वाक्यानि पुनः लिखत– (केवलं पञ्चप्रश्नाः)**

(*i*) राज्ञः दानशीलतां श्रुत्वा जनाः तत्र आयान्ति स्म।

(*ii*) गुरुषु अवधीरणा एव विषम्।

(*iii*) भीमः एकाकी एव द्रोणपुत्राय अलम्।

(*iv*) एकस्मिन् वर्षे चतुर्विंशतिः पक्षाः।

(*v*) चतुर्दश मन्वन्तराणां समूहः कल्पः।

(*vi*) मयूरस्य नृत्यं प्रकृतेः आराधना।

**16. अधोलिखितयोः श्लोकयोः अन्वयम् उचितैः पदैः पूरयित्वा पुनर्लिखत–**

**I.** पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

**अन्वयः –** पिता (*i*) .................... बाल्ये महत् (*ii*) .................... यच्छति। अस्य पिता किं (*iii*) .................... तेपे इति (*iv*) .................... तत्कृतज्ञता।

**मञ्जूषा**

| उक्तिः, विद्याधनम्, पुत्राय, तपः |
|---|

**II.** अधुना रमणीया हि, सृष्टिरेषा जगत्पतेः।
जीवाः सर्वेऽत्र मोदन्तां, भावयन्तः परस्परम् ॥

**अन्वयः –** जगत्पतेः एषा (*i*) .................... हि अधुना (*ii*) ....................। सर्वे (*iii*) .................... अत्र परस्परम् (*iv*) .................... मोदन्ताम्।

**मञ्जूषा**

| जीवाः, सृष्टिः, भावयन्तः, रमणीया |
|---|

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–**

**II.** काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

**भावार्थः** – श्रीकृष्णः अर्जुनस्य शङ्कायाः समाधानं कुर्वन् वदति–महाबाहो! तव समस्यायाः मूलकारणं एषः (*i*) ……… क्रोधश्च स्तः। इमौ (*ii*) ………… जातौ स्तः। अतः महाशनं (*iii*) ………… एनमेव त्वम् अस्मिन् संसारे (*iv*) ………… जानीहि।

**मञ्जूषा**

| |
|---|
| शत्रुम्, रजोगुणेन, कामः, महापाप्मानम् |

**17.** रेखाङ्कितपदानां **प्रसङ्गानुसारं शुद्धम् अर्थं लिखत– (केवलं प्रश्नचतुष्टयम्)**

(*i*) आपदां <u>तरणिः</u> धैर्यम्।
(क) नौका (ख) सूर्यः (ग) धरा (घ) नद्याः

(*ii*) <u>समन्तात्</u> वर्धमानाः अनलशिखाः आकाशं लिहन्ति।
(क) वामतः (ख) पृष्ठतः (ग) परितः (घ) उभयतः

(*iii*) क्रोधात् <u>सम्मोहः</u> भवति।
(क) मूर्छा (ख) नाशः (ग) सङ्गः (घ) किंकर्तव्यविमूढता

(*iv*) शिष्यः आचार्यात् <u>पादम्</u> आदत्ते।
(क) चरणम् (ख) चतुर्थांशम् (ग) पादपः (घ) पंक्तिम्

(*v*) कथम् इमम् सङ्कल्पं <u>श्रुत्वा</u> विस्मिताः यूयम्?
(क) आकर्ण्य (ख) विज्ञाय (ग) ज्ञात्वा (घ) पठित्वा

**18. अधोलिखित कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत–**

कर्मपुरनाम नगरे (*i*) …………… नामकः एकः कुमारः अवसत्। बाल्यकाले (*ii*) …………… सः विद्याविमुखः केनचित् चौरेण सह मिलित्वा (*iii*) ………… संलग्नः अभवत्। एकस्मिन् दिवसे सः दुष्टबुद्धि (*iv*) ………… सह कस्यचित् श्रेष्ठिनः गेहे चौर्यार्थं अगच्छत्। तदा तौ (*v*) ……… मार्गे क्रीडतः बालकान् अपश्यताम्। तदा तौ तान् (*vi*) ………… अवदताम्–" अये बालकाः! कथं भवन्तः गर्तसंकुले (*vii*) …………… क्रीडन्ति? यदि कोऽपि गर्ते पतेत् तर्हि पतेत् तर्हि (*viii*) …………… भूत्वा सः चिरं कष्टम् अनुभवेत्।" इदं श्रुत्वा तेषु बालकेषु एकः उद्दण्डः बालकः अवदत्–"अरे! यदि एवं तर्हि कथं युवाम् अस्मात् मार्गात् चलथः। किम् इदम् उचितमस्ति?

**मञ्जूषा**

| |
|---|
| प्रच्छन्नभाग्यः, नतोन्नते, विकलाङ्गः, चौरेण, दुर्व्यसनेन, बालान्, चौर्यकर्मणि, मार्गे |